# Shri Krishnastotram by Radha

# શ્રીકૃષ્ણસ્તોત્રમ્ રાધાકૃતમ્

## Document Information

Text title : kRRiShNastotram by rAdhA

File name : kRRiShNastotramrAdhA.itx

Category : devii, krishna, radha, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Brahmavaivartapurana Shrikrishnakhanda adhyAya 27, verses 99-113

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રમ્ રાધાકૃતમ્

ગોલોકનાથ ગોપીશ મદીશ પ્રાણવલ્લભ ।
હે દીનબન્ધો દીનેશ સર્વેશ્વર નમોઽસ્તુ તે ॥ ૧॥

ગોપેશ ગોસમૂહેશ યશોદાઽઽનન્દવર્ધન ।
નન્દાત્મજ સદાનન્દ નિત્યાનન્દ નમોઽસ્તુ તે ॥ ૨॥

શતમન્યોર્ભગ્નમન્યો બ્રહ્મદર્પવિનાશક ।
કાલીયદમન પ્રાણનાથ કૃષ્ણ નમોઽસ્તુ તે ॥ ૩॥

શિવાનન્તેશ બ્રહ્મેશ બ્રાહ્મણેશ પરાત્પર ।
બ્રહ્મસ્વરૂપ બ્રહ્મજ્ઞ બ્રહ્મબીજ નમોઽસ્તુ તે ॥ ૪॥

ચરાચરતરોર્બીજ ગુણાતીત ગુણાત્મક ।
ગુણબીજ ગુણાધાર ગુણેશ્વર નમોઽસ્તુ તે ॥ ૫॥

અણિમાદિકસિદ્ધીશ સિદ્ધેઃ સિદ્ધિસ્વરૂપક ।
તપસ્તપસ્વિંસ્તપસાં બીજરૂપ નમોઽસ્તુ તે ॥ ૬॥

યદનિર્વચનીયં ચ વસ્તુ નિર્વચનીયકમ્ ।
તત્સ્વરૂપ તયોર્બીજ સર્વબીજ નમોઽસ્તુ તે ॥ ૭॥

અહં સરસ્વતી લક્ષ્મીર્દુર્ગા ગઙ્ગા શ્રુતિપ્રસૂઃ ।
યસ્ય પાદાર્ચનાન્નિત્યં પૂજ્યાસ્તસ્મૈ નમો નમઃ ॥ ૮॥

સ્પર્શને યસ્ય ભૃત્યાનાં ધ્યાને ચાપિ દિવાનિશમ્ ।
પવિત્રાણિ ચ તીર્થાનિ તસ્મૈ ભગવતે નમઃ ॥ ૯॥

ઇત્યેવમુક્ત્વા સા દેવી જલે સન્ન્યસ્ય વિગ્રહમ્ ।
મનઃપ્રાણાંશ્ચ શ્રીકૃષ્ણે તસ્થૌ સ્થાણુસમા સતી ॥ ૧૦॥

રાધાકૃતં હરેઃ સ્તોત્રં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
હરિભક્તિં ચ દાસ્યં ચ લભેદ્રાધાગતિં ધ્રુવમ્ ॥ ૧૧॥

વિપત્તૌ યઃ પઠેદ્ભક્ત્યા સદ્યઃ સમ્પત્તિમાપ્નુયાત્ ।
ચિરકાલગતં દ્રવ્યં હૃતં નષ્ટં ચ લભ્યતે ॥ ૧૨॥

બન્ધુવૃદ્ધિર્ભવેત્તસ્ય પ્રસન્નં માનસં પરમ્ ।
ચિન્તાગ્રસ્તઃ પઠેદ્ભક્ત્યા પરાં નિર્વૃતિમાપ્નુયાત્ ॥ ૧૩॥

પતિભેદે પુત્રભેદે મિત્રભેદે ચ સઙ્કટે ।
માસં ભક્ત્યા યદિ પઠેત્સદ્યઃ સન્દર્શનં લભેત્ ॥ ૧૪॥

ભક્ત્યા કુમારી સ્તોત્રં ચ શ‍ૃણુયાદ્વત્સરં યદિ ।
શ્રીકૃષ્ણસદૃશં કાન્તં ગુણવન્તં લભેદ્ધ્રુવમ્ ॥ ૧૫॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે
ગોપિકાવસ્ત્રહરણપ્રસ્તાવોનામ સપ્તવિંશોઽધ્યાયે
રાધાકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

Brahmavaivartapurana Shrikrishnakhanda adhyAya 27, verses 99-113
Proofread by PSA Easwaran

*Shri Krishnastotram by Radha*
pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*